# shrI ve NkaTesha kShamAtrayastriMshachChlokI

# શ્રીવેઙ્કટેશ ક્ષમાત્રયસ્ત્રિંશચ્છ્લોકી

## Document Information

Text title : venkaTeshakShamAtrayastriMshachChlokI

File name : venkaTeshakShamAtrayastriMshachChlokI.itx

Category : vishhnu, venkateshwara, stotra, Ananda-tIrtha, vishnu

Location : doc_vishhnu

Author : madanantAchArya

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Description-comments : Brihatstotraratnavali

Latest update : July 21, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીવેઙ્કટેશ ક્ષમાત્રયસ્ત્રિંશચ્છ્લોકી

શ્રીમદ્વેઙ્કટશૈલવર્યશિખરે રત્નપ્રદીપો મહાં
 ત્રૈલોક્યાન્ધતમિસ્ર ચૂષણકૃતે યો જાજ્વલીતિ સ્ફુટમ્ ।
કલ્યાણવ્રજરોધ્યનાદિસુ દૃઢાઘધ્વાન્ત વિધ્વંસનં
 કુર્વન્મઙ્ગલમાતનોતુ નિતરામાત્માનુરૂપં સ નઃ ॥ ૧॥

મહામોહમય્યાં ભવાબ્ધ્યન્તરીપે
 મહાધન્વમહ્યાં મદીયં ચરન્તમ્ ।
મૃગં સ્વાન્તનામાનમાર્તે પરીતં
 મહાંહોમૃગેન્દ્રૈ રમેશાશુ રક્ષ ॥ ૨॥

પ્રભો વેઙ્કટેશ પ્રભા ભૂયમી તે
 તમઃ સચ્છિનર્ત્તિ પ્રદેશે હ્યશેષે ।
અહો મે હૃદદ્રેર્ગુહાગૂઢમન્ધન્
 તમો નૈતિ નાશં કિમેતન્નિદાનમ્ ॥ ૩॥

અથાવૈમિ વૈતન્નિદાનં હૃદાહં
 સહા ત્વત્સપર્યાવિપર્યાસહેતૌ ।
કુમાર્ગે મહામોહમાર્ગે સનિષ્ઠઃ
 સુનિષ્ઠાતૃભાવં પ્રભો યદ્વહામિ ॥ ૪॥

જનં તાવકીનં કિમેનં સુદીનં
 વૃથાજાતમેવં વૃથોપેક્ષસે ત્વમ્ ।
રમેશૈવમેવં વૃથોપેક્ષસે ચેત્
 ક્ષમાયાઃ પ્રકાશો મદન્યેન કેન ॥ ૫॥

મદન્યઃ ક્વ વિપ્રેષુ વૈશ્યેષુ-
 રાજસ્વથો શૂદ્રજાતિષ્વથો સઙ્કરેષુ ।
નિકૃષ્ટઃ ક્વ દૃષ્ટઃ ક્વ વા તે ક્ષમાયાઃ
 પ્રકાશો રમેષ ધ્રુવં સ્યાત્પ્રહીણઃ ॥ ૬॥

રમા સા ક્વ યાતા ક્ષમોદ્બોધિની તે
    મમાતુલ્યમાતા તવોરસ્થલસ્થા ।
મમાભાગ્યજાતાત્તવાભોગ્યભૂતા
    રમાપિ પ્રભો કિં પ્રમોદાવહા તે ॥ ૭॥

ક્ષમા યાતુ ગુપ્તા રમાયા વિધેયં
    ક્વ વાત્સલ્યભૂમા યતો દોષિવૃન્દમ્ ।
મહાનન્દમેતિ હ્યહો મત્પ્રવર્જે
    પ્રવૃત્તિઃ કિમસ્ય પ્રભો વેઙ્કટેશ ॥ ૮॥

દયા સા ક્વ યાતા યયા દુઃખિબન્ધો
    પરેષાં વિષાદો વૃષાદ્રીશ નાશ્યઃ ।
મમામન્દદુઃખપ્રણાશે પ્રકાશં
    ન સા યાતુમર્હા કિમસ્યાવ્રતં કિમ્ ॥ ૯॥

પરિત્યજ્ય ભોગં પરવ્યોમનિસ્વં
    મહાનન્દધામન્યપીહાહિ શૈલે ।
યદર્થે સમાયાસ્તદર્થે વિચિન્ત્ય
    પ્રભો વેઙ્કટેશ દ્રુતં માં સુરક્ષ ॥ ૧૦॥

પુરા કસ્ય ચિદ્રો મહાપાપદાહાત્
    અભૂત્તે ભિદા શ્રીગિરે વેઙ્કટેતિ ।
મમા તુલ્યપાપ પ્રદાહાત્તવાદ્ય
    અભિધા સ્યાન્નવીના રમેશાખિલેડ્યા ॥ ૧૧॥

મમામન્દ પાપપ્રવૃત્તેર્નિવૃત્તિં
    યદીક્ષેત ભો ભો ભવાન્ રક્ષિતું મામ્ ।
તદામન્દકલ્લોલજાલાકુલેબ્ધૌ
    ભવાન્ સ્નાતુમિચ્છેદ્દ્વિરામં નિરીક્ષ્ય ॥ ૧૨॥

ક્વ તચ્ચક્રમાસ્તે નિકૃત્તારિચક્રં
    ભવદ્ભક્તચક્રે શુભં યેન ચક્રે ।
હરે ચક્રમેતત્તવૈતજ્જનસ્ય
    પ્રભૂંતાઘચક્રં ન કિમ્ છેત્તુમીષ્ટે ॥ ૧૩॥

નિયુજ્ય સ્વચક્રં મમાઘૌઘચક્રં

ન ચેચ્છેત્સ્યસિ ત્વં નદા કસ્ય હાનિઃ
તવૈવેતિ સત્યં યદેતજ્જગત્યા
    વશં કોઽપિ યાયાદિનીક્ષા કૃતેયમ્ ॥ ૧૪॥

નિકૃષ્ટોત્તમં મા વિક્રુદ્ધં વિવાયાનુ
    કમ્પાં વિદધ્યા યદિ ત્વં રમેશ ।
તદૈતત્સમીક્ષ્યેહ વશ્યા ભવેયુ
    સ્તવાનેકલોકા નિકૃષ્ટાશ્ચ શિષ્ટા ॥ ૧૫॥

મમોત્તુઙ્ગચેતસ્તુરંગોધિરોહો
    ચિતસ્તેધિરૂઢો મનોજાધિરાજા ।
નિરસ્યાશુ તં ભોઃ સભારોહ તં કિં
    વૃથોપેક્ષસે ત્વં ત્વં ત્વદીયં તુરઙ્ગમ્ ॥ ૧૬॥

મદીયે ત્વદીયાલયેનાદિસિદ્ધે
    હ્રદીશ ત્વદન્યે પરીવારયુક્તાઃ ।
કદાચિત્સમાગત્ય તિષ્ઠન્તિ તાન્નો
    નિરસ્યેર્યદિ સ્યાત્તદીયં ગૃહં તત્ ॥ ૧૭॥

મહાદુષ્ટકામ પ્રભૃત્યન્ત્યવર્ણો
    ષિતેસ્વાન્તસદ્મન્યશુદ્ધે મદીયે ।
નિરસ્યાશુ તં તે પદામ્ભોજયુગ્મ
    પ્રવેશે ન શુદ્ધં ગૃહં તદ્વિધેહિ ॥ ૧૮॥

ભવદ્દિવ્યદેહ પ્રભાદીપજાલ
    પ્રભાભિર્વિધુન્વન્ પ્રકૃષ્ટં તમિસ્રમ્ ।
ત્વદીયૈઃ સહ ત્વં કુટુમ્બૈ રમેશ
    વસાસ્મિન્ ગૃહે મે સુખી સ્વાન્તનામ્નિ ॥ ૧૯॥

અવિદ્યાર્કવૃક્ષં હૃદાવાલરૂઢ
    મમાનાદિમૂલં વિભિન્દન્ વિમૂલમ્ ।
સમાવાપ્ય બીજં ત્વદીયાંઘ્રિભક્તિ
    પ્રકૃષ્ટામ્રબીજમ્ રમેશેહ રક્ષ ॥ ૨૦॥

ત્વદાજ્ઞાવશેનાદધાનોઽપિ કિઞ્ચિત્
    સ્વતન્ત્રોઽહમેવં કરોમી ત્યહંયુઃ ।
સુધા ભાવમેનં વૃથા ભાવય ત્વં

ત્વદાધીન્યભાવં સદા ભાવયેશ ॥ ૨૧॥

બહિર્ભાવયામિ સ્વવાચાખિલાનિ
ત્વદીયાન્યમૂનીતિ ભો વેઙ્કટેશ ।
હૃદિ ત્વધ્યવસ્યે મમૈવોપભોગ્ય
અન્યમૂનીતિ નિત્યં જહીદં રમેશ ॥ ૨૨॥

પરસ્વસ્પૃહા મે સદા વોભવીતિ
પ્રથીયસ્યમુષ્યાશુભેનૈમિ મોદમ્ ।
પરસ્યાસુ નાશે તદીયં મદીયં
ભવેદિવ્યહોમે દુરાશાં જહીશ ॥ ૨૩॥

પરાલાભલબ્ધપ્રણાશાવવેક્ષ્ય
પ્રપદ્યે મહાલાભયુગ્મપ્રમોદમ્ ।
ધનાપ્તૌ પરસ્ય સ્વીકીયસ્ય નાશં
ભજામીત્યસૂયાં જહિ શ્રીનિવાસ ॥ ૨૪॥

પરસ્વાપહારે મમ સ્વાપહારઃ
પરાનર્થદૃષ્ટૌ મમાનર્થલાભઃ ।
પરાનન્દલાભે મમાનન્દલાભો
મહાનિત્યમૂં મે મનીષાં વિધત્સ્વ ॥ ૨૫॥

મહાકણ્ટકારિં મહાસઙ્કટં
ભોસ્ત્વંઘ્રિપ્રફુલ્લારવિન્દાર્પણેન ।
ઇમં દેશમાધા મુદં સંદધાનં
ભવદ્ભક્તસંઘં મહાન્તં રમેશ ॥ ૨૬॥

અકલ્યાણમેતં સકલ્યાણમાધાઃ
કિમત્રાદિમૂલં ન જાને રમેશ ।
અથાવૈમિ હેતું તવાધ્યાજભૂયઃ
કૃપાપારિસિન્ધો પ્રરીરાહમેવ ॥ ૨૭॥

સકૃતે પદાબ્જપ્રચારેણ નાલં
વિવા યાન્યદેશે નિવાસે નિકામમ્ ।
ઇહૈવાસ ત્વં મમત્વં વહ ત્વં
કિમર્થે તવાર્થે ત્વદન્યઃ પ્રપશ્યે ॥ ૨૮॥

અથૈકોઽપિ કો વા ત્વદર્થે ત્વદન્યઃ
    સમાલક્ષિતું વા સમારક્ષિતું વા ।
સમર્થોઽસ્તિ લક્ષ્મીપતે વેઙ્કટાદ્રેઃ
    પતે તત્ર કિમ્ વાધિકં નેહ કિં વા ॥ ૨૯ ॥

યદ્યપ્યસ્તિ તત્ર ત્વદાવાસભૂમ્ના
    તદત્રાપિ ચ સ્યાત્ત્વદીયાગમશ્ચેત્ ।
મમામન્દ પાપપ્રવૃત્તિં નિરીક્ષ્ય
    અગમશ્ચેન્ન તે સ્યાદત્તા કસ્ય હાનિઃ ॥ ૩૦ ॥

અથાલ્પસ્ય હેતોર્વિહાતું બહુ સ્યાત્
    તવેદં ન યુક્તં પ્રભો વેઙ્કટેશ ।
અથાનલ્પ પાપપ્રવૃત્તિર્મદીયા
    નિવર્ત્યા ન કિં તેઽખિલાઘૌઘનાશિન્ ॥ ૩૧ ॥

મૃગપતિપદં શ્ચારૂઢશ્ચેન્નિબદ્ધસટાજટીમ-
    પ્યનલમિભરાટ્કુંભાભેદિપ્રભૂતરવે યયા ।
પ્રથમગુરુભિર્ગીતં નેચ્યે વિડમ્બયતા મયા
    શુનયસદૃશં હાસ્યં પ્રાપ્તં તથા નિયતં ત્વિદમ્ ॥ ૩૨ ॥

ઇત્થં શ્રી વેઙ્કટાદ્રિપ્રભુપદયુગલી
ભક્તવર્યસ્ય ગઙ્ગાવિષ્ણોર્યાઞ્ચાવિશેષાદ્
    વ્યરચિ કૃતિરિયં વેઙ્કટેશક્ષમાયઃ ।
શ્રીશૈલાનન્તવર્યાન્વયસમુદયિના
વેઙ્કટાર્યેણ ભક્ત્યા નિક્ષિપ્તા તત્પદાબ્જે
    મુદમતિતનુતાં તન્વતાં સ્વાન્તદેશે ॥ ૩૩ ॥

॥ ઇતિ શ્રીમદનન્તાચાર્યવિરચિતં શ્રી વેઙ્કટેશ
ક્ષમાત્રયસ્ત્રિંશચ્છ્લોકીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by YV Malleswara Rao malleswararaoy@yahoo.com
Brihatstotraratnavali

*shrI ve NkaTesha kShamAtrayastriMshachChlokI*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*